# .. shrIvibhIShaNakRitam hanumatstotram ..

# ॥ શ્રીહનુમત્સ્તોત્રં વિભીષણકૃતમ્ ॥

## Document Information

Text title : vibhiiShaNakRitam hanumatstotram
File name : hanumatstotramvibhishanam.itx
Location : doc_hanumaana
Language : Sanskrit
Subject : hinduism/religion
Transliterated by : Ravindra Bhalekar ravibhalekar at hotmail.com
Proofread by : Ravindra Bhalekar ravibhalekar at hotmail.com
Latest update : March 19, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહનુમત્સ્તોત્રં વિભીષણકૃતમ્ ॥

શ્રીગણેશાય નમઃ ।
નમો હનુમતે તુભ્યં નમો મારુતસૂનવે ।
નમઃ શ્રીરામભક્તાય શ્યામાસ્યાય ચ તે નમઃ ॥ ૧॥

નમો વાનરવીરાય સુગ્રીવસખ્યકારિણે ।
લઙ્કાવિદાહનાર્થાય હેલાસાગરતારિણે ॥ ૨॥

સીતાશોકવિનાશાય રામમુદ્રાધરાય ચ ।
રાવણાન્તકુલચ્છેદકારિણે તે નમો નમઃ ॥ ૩॥

મેઘનાદમખધ્વંસકારિણે તે નમો નમઃ ।
અશોકવનવિધ્વંસકારિણે ભયહારિણે ॥ ૪॥

વાયુપુત્રાય વીરાય આકાશોદરગામિને ।
વનપાલશિરશ્છેદલઙ્કાપ્રાસાદભઞ્જિને ॥ ૫॥

જ્વલત્કનકવર્ણાય દીર્ઘલાઙ્ગૂલધારિણે ।
સૌમિત્રિજયદાત્રે ચ રામદૂતાય તે નમઃ ॥ ૬॥

અક્ષસ્ય વધકર્ત્રે ચ બ્રહ્મપાશનિવારિણે ।
લક્ષ્મણાઙ્ગમહાશક્તિઘાતક્ષતવિનાશિને ॥ ૭॥

રક્ષોઘ્નાય રિપુઘ્નાય ભૂતઘ્નાય ચ તે નમઃ ।
ઋક્ષવાનરવીરૌઘપ્રાણદાય નમો નમઃ ॥ ૮॥

પરસૈન્યબલઘ્નાય શસ્ત્રાસ્ત્રઘ્નાય તે નમઃ ।
વિષઘ્નાય દ્વિષઘ્નાય જ્વરઘ્નાય ચ તે નમઃ ॥ ૯॥

મહાભયરિપુઘ્નાય ભક્તત્રાણૈકકારિણે ।
પરપ્રેરિતમન્ત્રાણાં યન્ત્રાણાં સ્તમ્ભકારિણે ॥ ૧૦॥

પયઃપાષાણતરણકારણાય નમો નમઃ ।
બાલાર્કમણ્ડલગ્રાસકારિણે ભવતારિણે ॥ ૧૧॥

નખાયુધાય ભીમાય દન્તાયુધધરાય ચ ।
રિપુમાયાવિનાશાય રામાજ્ઞાલોકરક્ષિણે ॥ ૧૨॥

પ્રતિગ્રામસ્થિતાયાથ રક્ષોભૂતવધાર્થિને ।
કરાલશૈલશસ્ત્રાય દ્રુમશસ્ત્રાય તે નમઃ ॥ ૧૩॥

બાલૈકબ્રહ્મચર્યાય રુદ્રમૂર્તિધરાય ચ ।

વિહઙ્ગમાય સર્વાય વજ્રદેહાય તે નમઃ ॥ ૧૪॥

કૌપીનવાસસે તુભ્યં રામભક્તિરતાય ચ ।
દક્ષિણાશાભાસ્કરાય શતચન્દ્રોદયાત્મને ॥ ૧૫॥

કૃત્યાક્ષતવ્યથાઘ્નાય સર્વક્લેશહરાય ચ ।
સ્વામ્યાજ્ઞાપાર્થસઙ્ગ્રામસઙ્ખ્યે સઞ્જયધારિણે ॥ ૧૬॥

ભક્તાન્તદિવ્યવાદેષુ સઙ્ગ્રામે જયદાયિને ।
કિલ્કિલાબુબુકોચ્ચારઘોરશબ્દકરાય ચ ॥ ૧૭॥

સર્પાગ્નિવ્યાધિસંસ્તમ્ભકારિણે વનચારિણે ।
સદા વનફલાહારસન્તૃપ્તાય વિશેષતઃ ॥ ૧૮॥

મહાર્ણવશિલાબદ્ધસેતુબન્ધાય તે નમઃ ।
વાદે વિવાદે સઙ્ગ્રામે ભયે ઘોરે મહાવને ॥ ૧૯॥

સિંહવ્યાઘ્રાદિચૌરેભ્યઃ સ્તોત્રપાઠાદ્ ભયં ન હિ ।
દિવ્યે ભૂતભયે વ્યાધૌ વિષે સ્થાવરજઙ્ગમે ॥ ૨૦॥

રાજશસ્ત્રભયે ચોગ્રે તથા ગ્રહભયેષુ ચ ।
જલે સર્વે મહાવૃષ્ટૌ દુર્ભિક્ષે પ્રાણસમ્પ્લવે ॥ ૨૧॥

પઠેત્ સ્તોત્રં પ્રમુચ્યેત ભયેભ્યઃ સર્વતો નરઃ ।
તસ્ય ક્વાપિ ભયં નાસ્તિ હનુમત્સ્તવપાઠતઃ ॥ ૨૨॥

સર્વદા વૈ ત્રિકાલં ચ પઠનીયમિદં સ્તવમ્ ।
સર્વાન્ કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૨૩ ॥

વિભીષણકૃતં સ્તોત્રં તાર્ક્ષ્યેણ સમુદીરિતમ્ ।
યે પઠિષ્યન્તિ ભક્ત્યા વૈ સિદ્ધ્યસ્તત્કરે સ્થિતાઃ ॥ ૨૪॥

ઇતિ શ્રીસુદર્શનસંહિતાયાં વિભીષણગરુડસંવાદે
વિભીષણકૃતં હનુમત્સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ravindra Bhalekar ravibhalekar @ hotmail.com

.. shrIvibhIShaNakRitam hanumatstotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*